कुरङ्गः” इति । वहिरङ्गशास्त्रीयनिमित्तसमुदायमध्ये अन्तर्भूतानि अङ्गानि निमित्तानि यस्य । व्याकरणोक्ते परनित्यवहिरङ्गबाधके नैमित्तिककार्य्यभेदे, तद्बोधकशास्त्रे च । यथा ग्रामणिनी कुले इत्यादौ “इकोऽचीति” पा०)नित्यप्राप्तं नुमं बाधित्वा “ह्रस्वो नपुंसके” इति पा० ह्रस्वः । पूर्व्वं कृते तु नुमि अजन्तत्वाभावात् ह्रस्वो न स्यात् । ततश्च नुमुरूपकार्य्ये प्रत्ययस्याजरूपं निमित्तमपेक्षतेइति तद्बहिरङ्गं, ह्रस्वस्तु प्रकृतिमात्रसापेक्षत्वात् अन्तरङ्ग इति तस्य वहिरङ्ग-निमित्तककार्य्यबाधकत्वे वीजम् । “परनित्यान्तरङ्गापवादा-नामुत्तरोत्तरं बलीय इति” “असिद्धं वहिरङ्गमन्तरङ्गे” इति च परि०सि०कौ० । एतन्मूलिकैव “वहिरङ्गविधिभ्यस्तु अन्तरङ्गविधिर्बलीति”कारिका । अन्तः आसन्नमङ्गं कर्म्म० । आरादुपकारके न० यथा ब्रह्मसाक्षात्कारे श्रवणमनन निदिध्यासनानि, संप्रज्ञातसमाधौ च धारणादीनि त्रीणि अन्तरङ्गाणि । यमादयस्तु पञ्च वहिरङ्गाणि । तथा हि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयइत्यष्टौ संप्रज्ञातसमाधेरङ्गानि तत्र यमादयः वहिरङ्गाणि, प्रति-बन्धकस्य चित्तकायप्राणेन्द्रियमलस्य निवर्त्तनेन परम्परया उपकारकत्वात्, धारणादयस्तु संप्रज्ञातसमाधेः समान-विषयतया साक्षात्स्वरूपोपकारकत्वादन्तरङ्गाणीति अत एव धारणादित्रयमभिधाय “त्रयमन्तरङ्गं पूर्व्वेभ्य” इति पात०सूत्रे धारणादित्रयस्यान्तरङ्गत्वमुक्तम् । धारणादि-स्वरूपादि तत्तच्छब्दे वक्ष्यते । असंप्रज्ञातसमाधौ तु सर्व्वा-ण्येव वहिरङ्गाणि असमानविषयत्वादिति बोध्यम् ।

**अन्तरचक्र** न० अन्तरं मध्यवर्त्ति चक्रम् । तन्त्रोक्तेषु देह-स्थसुषुम्णामध्यस्थेषु मूलाधारादिषु षट्सु पद्माकारचक्रेषु । विवरणं षट्चक्रशब्दे दृश्यम् । ६त० । आत्मीयसमूहे न० ।

**अन्तरज्ञ** त्रि० अन्तरं भेदं विशेषं जानाति ज्ञा–क ६त० । विशेषज्ञे “नान्तरज्ञाः श्रियो जातु प्रियैरासां न भूयते” इति किरा० ।

**अन्तरण** न० अन्तरं व्यवहितं करोति अन्तर+णिच्–भावे ल्युट् । अन्तरितकरणे व्यवधापने, “हविरन्तरणे प्राक् प्रधानेज्याया” इति कात्या० २५,५,१५, “यदि नाम हविरन्तरितं न गृहीतमेव, प्राक् प्रधानेज्यायाः स्मृत्वा अन्वाहरेत् हविषोऽन्तरणं बहूनां मध्ये एकस्याग्रहण-मिति” तद्भा० ।

**अन्तरतम** त्रि० अतिशयेन अन्तरः सदृशः, अत्यन्तसदृशे “स्थानेऽन्तरतम” इति पा० । सादृश्यञ्च “तुल्यास्यप्रयत्न-मिति” पा० सूत्रोपात्तं स्थानादिसाम्यम्, यथा कका-रादीनां ङकारादिषु तुल्यस्थानप्रयत्नवत्त्वेन साम्यम् एवं सकारस्य थकारे । आत्मीयतमे च ।

**अन्तरतस्** अव्य० सप्तम्यर्थे तसि । मध्ये इत्याद्यर्थे । “तम-न्तरतःकृत्वा रावणं वाक्यमब्रवीत्” इति रामा० ।

**अन्तरदृश्** पु० अन्तरे दृग् यस्य । अन्तरज्ञे परमात्मानुसन्धा-यिनि । अन्तरं भेदं पश्यति दृश–क्विप् ६त० । विभेदज्ञे त्रि० ।

**अन्तरदेश** पु०कर्म्म० । मध्यदेशे तद्विवरणं मध्यदेशशब्दे दृश्यम्

**अन्तरपु(पू)रुष** पु० अन्तरः मध्यवर्त्ती पुरुषः वा दीर्घः । अन्तर्यामिनि परमेश्वरे । “मन्यन्ते च पापकृतो “न कश्चित् पश्यतीति नः” । तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तर-पूरुष” इति मनुः ।

**अन्तरपूजा** स्त्री ७त० तन्त्रोक्ते मनःकल्पितोपचारेण पूजा-याम् तत्प्रकारस्तु अन्तर्यागशब्दे वक्ष्यते ।

**अन्तरप्रभव** पु० अन्तरेभ्यो भिन्नवर्णमातृपितृभ्यः प्रभवति प्र+भू–अच् ५त० । सङ्कीर्णवर्णे मूर्द्धावसिक्तादौ । अन्तर-प्रभवाश्च द्विविधाः अनुलोमजाः, प्रतिलोमजाश्च तत्रोत्कृष्ट-वर्णात् अपकृष्टवर्णायां स्त्रियां जाताः मूर्द्धावसिक्तादयः अनुलोमजाः, अपकृष्टवर्णात् उत्कृष्टवर्णायां स्त्रियां जाताः प्रतिलोमजाः सूतादयः । “भगवन्! सर्व्ववर्णानां यथा-वदनुपूर्व्वशः । अन्तरप्रभवानाञ्च धर्म्मान्नो वक्तुमर्हसीति” मनुः । एतेषां भिन्नवर्णजातत्वात् अन्तरनामत्वमपि मनुना हि अनुलोमजान् प्रतिलोमजांश्च उक्त्वा “तान-न्तरनाम्नस्तु मातृदोषात् प्रचक्षते” इत्युक्तम् । अधिकं वर्ण-सङ्करशब्दे वक्ष्यते ।

**अन्तरय** पु० अन्तर्मध्ये अयः गमनम् इण्–अच् । मध्यगतौ व्यवधाने । ल्युडन्तमप्यत्र न० । अन्तरं याति या–क । देहमध्यस्थचित्तगते त्रि० ।

**अन्तरशायिन्** पु० अन्तरे शेते शी+णिनि । चित्तस्थे जीवे । तस्य तत्र प्रतिविम्बरूपेण स्थितत्वात्तथात्वम् ।

**अन्तरस्थ** पु० अन्तरे देहमध्ये तिष्ठति स्था–क ७त० । देहमध्यस्थचित्तस्थे जीवे ।

**अन्तरा** अव्य० अन्तरेति इण्–डा । निकटे, मध्ये, विनार्थे च । तत्र मध्ये “अन्तरा पतिते पिण्डे सन्देहे वा पुन-र्हरेदिति” या० । “अन्तरा स्तनस्तनके” इति स्मृतिः । “पशुमण्डूकमार्ज्जारश्वसर्पनकुलादिभिः अन्तरा गमने, विद्यादनध्यायमहर्निशमिति” मनुः । “सौमित्रिर्निशि-तैर्वाणैरन्तरा शकलीकृता” इति रघुः । “अचले वीज-